वाग्निजातीयम् Kāśi. i. 79. 20 (*on* 2. 33); धूमजातीयमग्निजातीयेनाविनाभूतम् … गृहीतम् PrakaVi. 41. 9; अग्निजातीयस्य कस्यचित्तज्जन्यतामात्रेण सर्वस्याग्नेः सामान्येनतज्जन्यत्वयोग्यता वक्तव्या MayūMāli. 78. 13 (*on* i. 4. 10)

**अग्निजात्य** (agnijāt–ya) *adj.* belonging to a class of fire अग्निजात्या मगाः प्रोक्ताः BhaviP. 208B. 18 (i. 139. 44)

**अग्निजापिन्** (agnijāp–in) *adj.* muttering the name of Agni द्विशतसाहस्रशीर्षं तरसाग्निजापी भवेत् PārāyU. 303. 4.

**अग्निजाया** (agni–jāyā) *f.* wife of the fire-god, *svāhā* प्रणवं प्राक्समुद्धृत्य मनुं वाग्निजाययोः। आयान्तं विन्यसेच्चक्रं अग्निप्राकारसंज्ञितम् PāraS. 24. 131; हनद्वयं वर्म सास्त्रमग्निजाया तथान्ततः AhirbuS. 57. 59; पायसान्नं च नैवेद्यं समर्प्योमग्निजायया S'ivaP. vi. 19. 41 (496B. 11); गच्छद्वयं नमःशब्दो महाकायाग्निजायया ĪśānS'iPa. i. 43. 11; ii. 19. 2; होमेऽग्निजाया या प्रोक्ता सा होमे परिनिष्ठिता S'aktiSamT. iii. 3. 209; वर्मफडग्निजावे(? ये)ति ज्वालामालिनी ParaśuKS. 4. 9 (147. 13)

**अग्निजायान्त** (agnijāyānta) *adj.* [*f.* –ā] ending with the word *svāhā* प्रबुध्यन्तेऽग्निजायान्ता विद्याः स्त्रीदेवताः प्रिये KulārT. 16. 40; वाग्बीजमग्निजायान्तं रक्तसूतिनिवर्तकम् ĪśānS'iPa. i. 52. 105; ii. 18. 89; गोपालायाग्निजायान्तं कुक्षियुग्मं सदावतु PañcaRā.(Nā.) iv. 5. 15.

**अग्निजार** (agni–jāra) *m.* name of a frothy substance of the sea अग्निजारं नवे कुम्भे स्थापयित्वाधरोत्तरम् Rasā. 6. 19; समुद्रेणाग्निनक्रस्य जरायुर्बहिरुज्झितः। संशुष्को भानुतापेन सोऽग्निजार इति स्मृतः RasRaSa. 3. 135; 12. 72; अग्निजारोऽग्निनिर्यासः DhanvNi. 291. 25.

**अग्निजाल** (agni–jāla) *m.* name of a frothy substance of the sea [PW.; MW.]; *n.* a mass of fire आदाय हालाहलमग्निजालम् PadyāTa. 165.

**अग्निजित्** (agni–jit) *m.* name of a sage गन्धारभूमौ राजर्षिमग्न(? ग्नि)जित् स्वर्गमार्गगः। …पप्रच्छ चान्द्रभागं पुनर्वसुम् BhelaS. 30. 3 (1. 18)

**अग्निजिह्व** (agni–jihvá) *adj.* [*f.*–ā] **A** having (sacrificial) fire for tongue (consuming the offering through fire), whose tongue is Agni शृण्वन्तु स्तोमं मरुतः सुदानवोऽग्निजिह्वा ऋतावृधः R̥V. i. 44. 14; अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह R̥V. i. 89. 7 = KāṭhS. 35. 1 = VājaS. 25. 20; R̥V. iii. 54. 10; ये अग्निजिह्वा ऋतसाप आसुर्ये मनुं चक्रुरुपरं दसाय R̥V. vi. 21. 11; vi. 50. 2; ये अग्निजिह्वा उत वा यजत्राः R̥V. vi. 52. 13 = TaiS. II. iv. 14. 5 = MaiS. iv. 12. 1 = VājaS. 33. 53 = TaiBr. II. viii. 6. 5; R̥V. vii. 66. 10; x. 65. 7; अग्निजिह्वेभ्यस्त्वर्तायुभ्य इत्याहैतावतीर्वै देवतास्ताभ्य एवैन सर्वाभ्यो गृह्णाति TaiS. III. v. 9. 2; III. v. 8. 1; KāṭhS. 29. 5; KapiKaS. 45. 6; ये अग्निजिह्वाः … ते नो देवाः … शर्म यच्छत AitĀ. V. i. 1. 18; TaiĀ. i. 5. 1 (30. 1); अग्निजिह्वो दर्भरोमा … आदिदेवो महायोगी चकार जगतीं पुनः ViṣṇuSm. 1. 3; HariVam̐. 31. 22; अग्निजिह्वो दर्भलोमा …। प्रभुर्लोकहितार्थाय दंष्ट्राग्रेणोज्जहार ताम् (पृथिवीम्) MatsyaP. 248. 68; VāyuP. i. 6. 16; i. 50. 35; BrahmāṇḍP. i. 5. 16; इष्ट्वाग्निजिह्वं पयसा पुरुषं यजुषां पतिम्। निम्लोचत्यर्क आसीनमग्न्यगारे समाहितम् BhāgP. iii. 14. 8; ViṣṇuDhaP. i. 3. 3; अत्र विद्यते…अन्तरीक्षं खगानीकैरग्निजिह्वैः समावृतम् VarāP. 200. 9; SkandP. vii(1). 277. 3; NaraP. 39. 11; यत्र विष्णुः … वाराहं रूपमास्थितः। … अग्निजिह्वः BrahmP. 213. 33; PadmP. v. 16. 55; **B** having a fiery or a burning tongue दिग्भ्यः समापेतुः सिंहव्याघ्रतरक्षवः। अग्निजिह्वाश्च भुजगाः MahāBhā. vii. 150. 100; अग्निजिह्वाम्… ज्वलत्प्रभाम्। भुञ्जते कपिलां ये तु शूद्रा लोभेन मोहिताः MahāBhā. xiv. App. I. 4 (1735); VṛGautaSm. 567. 17(9); त्वष्ट्रा यदग्निजिह्वन्तु लक्षणं परिभाषितम् VarāP. 90. 20.

**अग्निजिह्व** (agni–jihva) *m.* **1** name of (a seer) of a *gotra* अग्निजिह्वो विराडपः। … त्र्यार्षेयाभिमतास्तेषां सर्वेषां प्रवराः MatsyaP. 196. 43; मोहजिह्वो देवजिह्वो अग्निजिह्वविराडयः। …त्र्यार्षेयोऽपि मतश्चैषाम्…प्रवरः शुभः ViṣṇuDhaP. i. 112. 44; **2** a descendant of the *gotra* of the seer Agnijihva रौक्षायणाः कपिलाः…अग्निजिह्वाः…इति रौक्षायणाः। ते पञ्चप्रवराः VīraMi. (Sam̐skāra.) 632. 3; **3** name of an Asura chief (पञ्चमे शर्कराभौमे) वैद्युतस्याग्निजिह्वस्य हिरण्याक्षस्य चालयम्। …राक्षसेन्द्रस्य BrahmāṇḍP. i. 20. 36; **4** a god द्यौरन्तरिक्षं क्षितिरग्निजिह्वा गावो द्विजाः संजहृषुर्नगाश्च BhāgP. viii. 18. 4; **5** name of a deity अग्निवेतालोऽग्निजिह्वः कराली काललोचनः (पूज्याः) AgniP. 312. 10; अग्निनेत्रं चाग्निजिह्वं विरूपाक्षमथोत्तरे (पूजयेत्) ĪśānS'iPa. ii. 45. 65; **6** name of a Vetāla अग्निजिह्वोऽस्ति वेतालः SkandP. iv. 68. 73; **7** name of one of the attendants of Viṣṇu in the group led by Kumuda कुमुदादेर्गणानां तु नामानि …शृणु…अग्निजिह्वो हुताशनः PāraS. 17. 159; **8** name of one of the seventy hosts or attendants of S'iva and Viṣṇu in the South-East quarter अग्निजिह्वो हुताशश्चाप्यग्निरूपोऽग्निकेतनः … आग्नेय्यां दिशि सप्ततिः ĪśānS'iPa. ii. 54. 94; **9** name of one of the eight deities to whom worship is offered on jars near the entrance of the shrine of a *kṣetrapāla* हेरुकस्त्रिपुरान्तश्चाप्यग्निर्वेताल एव च। अग्निजिह्वः …। भीमरूपोऽष्टमस्त्वेतान् द्वारकुम्भेषु पूजयेत् ĪśānS'iPa. ii. 60. 25; **10** name of one of the ten Bhairavas (हेतुकत्रिपुरान्तकाग्नियमजिह्वैकपादकालकरालभीमरूपहाटकेशाचलाः – दश भैरवाः) ParaśuKS. 7. 32 (221. 18) (comm. जिह्वापदम् अग्नियमयोरुभयत्र अन्वेति। एवं च अग्निजिह्वेति यमजिह्वेति); **11** name of a *yoga* of seven varieties (in Astrol.) सप्तषष्ठ्यादितिथयः सोमवारादिभिर्युताः। अग्निजिह्वाः सप्त योगा मङ्गले कुलनाशदाः VasiS. 42. 14; 43. 113.

**अग्निजिह्वा** (agni–jihvā́) *f.* **1** tongue or flame of fire अग्निजिह्वा धूमशिखा जयन्तीर्यन्तु सेनया AV. xi. 9. 19; वि द्योतन्ते अग्निजिह्वा हिरण्यवर्णा [अ]मृता [अ]प्स्वन्तस्समुद्रे AV. (P.) xvi. 150. 7; **2 A** name of a plant (identified as *lāṅgali* or *lāṅgaliyā* or *lāṅgalikā, kalikārī, viśalyā*), the plant *Methanica superba* नग्नजीवमग्निजिह्वामष्टौ वा वटशुङ्गानि (पिबेत्) AṣṭāSam̐. i. 200. 18 (2. 1); अग्निजिह्वेन्द्रपुष्पाग्निमुखी वह्निशिखा च सा। लाङ्गलिया ParyāRaMā. 88 = ParyāMu. 6. 51; RājNi. 136. 5 (*kalikārī*); MadaPāNi. 19. 323 (*kalikārī*); AbhidhāMañ. 93. 6 (*viśalyā*); ṢaḍrasaNi. 21. 14 (*viśalyā*); **2 B** name of a plant *jalapippalī* or *gajapippalī* (Viṣalāṅgalā) [APTE]; (?) *Commelina salicifolia.*

**अग्निजिह्वानिरूपण** (agnijihvā–nirūpaṇa) *n.* description pertaining to the tongues (i. e. flames) of fire अग्निजिह्वानिरूपणमपि दृश्यते S'ivārkaMaDī. i. 382. 22 (*on* i. 2. 22)

**अग्निजिह्वाभेद** (agnijihvā–bheda) *m.* variety of the tongues (i. e. flames) of fire एतेषु अग्निजिह्वाभेदेषु यः अग्निहोत्री चरते MuṇḍaUBh. 316. 18 (*on* i. 2. 5)

**अग्निजिह्वाविशेष** (agnijihvā–viśeṣa) *m.* a particular tongue (i. e. flame) of fire कराली तु स्त्रियामियम्। अग्निजिह्वाविशेषे NānārthāSam̐. ii. 77. 353.

**अग्निजिह्वाह्वय** (agnijihvāhvaya) *adj.* named Agnijihva (a variety of astrological *yoga*) अग्निजिह्वाह्वयो योगः पञ्चयोगश्च तद्गुणान्।…हन्ति VasiS. 43. 40.

**अग्निजीव** (agni–jīva) *m.* a living being with fire as his body [JainaL.]

**अग्निजीव** (agni–jīva) *adj.* dependent upon or living by fire, whose living or subsistence is dependent on fire गङ्गाम्भसि समाविष्टे ह्यग्नौ देवाश्च मानुषाः। जीवमुत्सर्जयामासुरग्निजीवा यतो मताः BrahmP. 98. 6.

**अग्निजीवन** (agni–jīvana) *m.* cf. **अग्निजीविन्** living by or on fire, one who subsists by making use of fire पीड्यन्ते गिरिनिलयाग्निजीविनश्च (v. l. °अग्निजीवन(? ना)श्च)…धरासुतस्य घाते AVPari. 51(4). 1.

**अग्निजीविका** (agni–jīvikā) *f.* means of livelihood depending on fire अप्यग्निजीविका Tantrākhyā. 28. 1.

**अग्निजीविन्** (agnijīv–in) *m.* living by or on fire, one who subsists by making use of fire (such as a black–smith, copper–smith or a fire–worker) पीड्यन्ते गिरिनिलयाग्निजीविनश्च … धरासुतस्य घाते AVPari. 51(4). 1; अग्निजीविन एकस्थान् वासयेत् ArthS'ā. i. 353. 3 (2. 36); अग्निजीविनो वा अग्निमवसृजेयुः ArthS'ā. iii. 170. 9 (12. 4); iii. 213. 6 (14. 1); येनाग्निमन्तो ब्राह्मणा अग्निजीविनश्च पीड्यन्ते ViṣṇuDhaP. ii. 166 (292A. 3); धूमोऽग्निजीविनां शस्तः SamarāSū. 26. 33.

**अग्निजुष्** (agni–juṣ) *adj.* devoted to Agni एतदादीनि सूक्तानि सहस्रमृषयो विदुः। नित्यमाप्यायते मन्त्रः सोऽयमग्निजुषा मया LakṣmīT. 31. 11.

**अग्निजुष्टत्व** (agnijuṣṭa–tva) *n.* the state of being enjoyed by the fire–god अग्न्युद्देशेन निरू(? रु)प्यमाणत्वमेवाग्निजुष्टत्वम् MayūMāli. 593. 8 (*on* ix. 1. 12)

**अग्निज्ञान** (agni–jñāna) *n.* perception or knowledge (of the existence) of fire प्रत्ययकारणं धूमज्ञानमग्निज्ञानस्य YogBh. 101. 4 (*on* 2. 28) (comm. ज्ञायत इति ज्ञानम्। अग्निश्चासौ ज्ञानं चेत्यग्निज्ञानम्); तत्रानुमाने लिङ्गज्ञानं प्रमाणं प्रमीयतेऽनेनेति व्युत्पत्त्या प्रमितिः प्रमाणस्य फलमग्निज्ञानम् NyāyKa. 213. 4; अग्निमत्ता धूमस्य पर्वतस्य वाग्निसंयोगो न त्वग्निज्ञानजनकत्वं तद्वत्ता TātpaṬ.(Vā.) 415. 21 (*on* ii. 1. 52); अग्न्याभासे अग्निज्ञानं प्रमाणम् PratyabhiVi. ii. 107. 5 (*on* ii. 3. 8); पर्वते तद्दर्शनादग्निज्ञानम् S'āstrDī. 61. 3 (*on* i. 1. 5); 63. 9 (*on* i. 1. 5); प्रमितिरग्निज्ञानम् Kiraṇā. 306. 12; PrakaVi. 414. 12; NyāySu.(Ja.) 76B. 5 (*on* i. 1. 1); YuktiSneha. 71. 22 (*on* i. 1. 5); Kāśi. i. 244. 11 (*on* 4. 96)

**अग्निज्ञापकत्व** (agnijñāpaka–tva) *n.* the state of being an indicator of (the existence of) fire धूमानुमानस्य पर्वतेऽग्निज्ञापकत्वं, नोत्पादकत्वम् Subodhi. 12. 29 (*on* 2. 24); BālamBha. ii. 31. 12 (*on* 2. 24)

**अग्निज्ञाप्य** (agni–jñāpya) *adj.* to be conveyed by fire अग्निज्ञाप्यं